**SSLC PRE-MODEL EXAMINATION 2023**

**GHS Koonathara**

11/2 HOURS
SCORE 40

**1-6 पञ्च प्रश्नानां प्रत्येकं एकैकः अङ्कः ।**

कोष्ठकात् समुचितमुत्तरं निर्धार्य लिखत ।

1 दीनवत्सला जननी इति पाठभागः महाभारतस्य कस्मात् पर्वात् उद्धृतः?

( भीष्मपर्वात्, वनपर्वात्, सभापर्वात् )

2 स्वराज्यं मम जन्माधिकारः' कस्य वचनमिदम् ?

( डा. एस्. राधाकृष्णस्य, बालगङ्गाधरतिलकस्य, महात्मागान्धिनः)

3 वृक्षायुर्वेदस्य कर्ता कः?

( सुरपालः, चरकः, वाग्भटः)

4 ' शङ्करदिग्विजयम् ' कस्मिन् काव्यविभागे अन्तर्भवति ?

( स्तोत्रकाव्ये , बालसाहित्ये, महाकाव्ये )

5 दीनं वृषभं दृष्ट्वा का रुरोद ?

(पार्वती , लक्ष्मीः , सुरभिः)

6 लाभानां श्रेष्टं किम् ?

(आरोग्यम् , धनम्, कीर्तिः)

**7-11 चतुर्णां प्रश्नानां प्रत्येकं द्वौ अङ्कौ ।**

7 उदाहरणानुसारं वाक्यं परिवर्तयत ।

उदा- अहं पाठं सुष्टु अपठम् । पूर्णमङ्कं न सम्प्राप्तवान् ।

**यद्यपि** अहं पाठं सुष्टु अपठम् **तथापि** पूर्णमङ्कं न सम्प्राप्तवान् ।

वर्षकालः समागतः। वृष्टिः नास्ति ।(यद्यपि- तथापि )

8 श्लोकं पठित्वा अधोदत्तेभ्यः उचितम् आशयं चित्वा लिखत ।

**भिक्षा त्वया दक्षिणहस्तदत्ता**

**मा ज्ञायतां वामकरेण ते सा ।**

**दानस्य चैवं निभृतं कृतस्य**

**पिता फलं दास्यति गुप्तदर्शी ।।**

**क)** ' दक्षिणहस्तेन कृतं भिक्षादानं वामहस्तः मा जानातु ' ।

**ख)** ' धर्माचरणम् आत्मनिर्वृत्यर्थम् एव भवेत्

9 उदाहरणानुसारं वाक्यं परिवर्तयत।

उदा - पिता बालकं ताडयति ।

पिता बालकं **अताडयत्** ।

महिला मन्दिरं गच्छति ।

महिला मन्दिरं --------- ।

10 श्लोकं पठित्वा गद्यक्रमं लिखत ।

**परिश्रमो मिताहारो**

**भूगतावश्विनीसुतौ**

**तावनादृत्य नैवाहं**

**वैद्यमन्यं समाश्रये ।।**

परिश्रमो --------- भूगातौ --------- तौ अनादृत्य --------

वैद्यं नैव --------- ।

11 . कोष्ठकात् उचितमुत्तरं चित्वा लिखत ।

अ) अहं मन्दिरं -------- ?

( गच्छति , गच्छतः, गच्छामि )

आ) त्वं पाठं ---------- ?

( पठामः , पठतु , पठसि )

12-13 प्रश्नानां प्रत्येकं एकैकः अङ्कः ।

12 उदाहरणानुसारम् एकपदं लिखत ।

सुराणाम् अधिपः - सुराधिपः।

नराणाम् अधिपः - ----------- ।

13 . उदाहरणानुसारं पदच्छेदं लिखत ।

नोत्थितः - न + उत्थितः ।

नोचितः - ------ + ------- ।

14 यथोचितं योचयत। द्वौ अङ्कौ ।

वनस्पतिः - सुरभी

शङ्करदिग्विजयम् - अश्विनीसुतौ

परिश्रमो मिताहारः - माधवविद्यारण्यस्वामी

धेनोः माता - पनसः

15 -17 द्वयः प्रश्नानां प्रत्येकं त्रयः अङ्काः।

15 समानार्थकपदानि चित्वा लिखत।

(मङ्गलम् , .मनोहरम्, पत्नी )

दारा -

शिवः -

रम्यम् -

16 उदाहरणानुसारं पट्टिकां लिखत ।

| कृतिः | कर्ता | विभागः |
|---|---|---|
| रामायणम् | वाल्मीकिः | इतिहासः । |
| ----------- | सुरपालः | शास्त्रग्रन्थः |
| शङ्करदिग्विजयम् | माधवविद्यारण्यस्वामी | -------- । |
| चरकसंहिता | -------- | आयुर्वेदग्रन्थः। |

17 वाक्यं पठित्वा क्त्वान्त - तुमुन्नन्त, ल्यबन्त पदानि विविच्य लिखत ।

राजप्रशस्तिपरां कृतिमेकं विरच्य समर्पयति चेत् बहु धनं प्रदातुं राजा सज्जः इति दूतःत्यागराजसमीपं गत्वा अवदत् ।

**18-21 त्रयाणां प्रत्येकं चत्वारः अङ्काः ।**

18 उदाहरणानुसारं पट्टिकां पूररयत ।

| लङ् | लट् | लोट् |
|---|---|---|
| अताडयत् | ताडयति | ताडयतु । |
| --------- | पृच्छति | --------- । |
| अनयत् | --------- | ---------- |

19 सूचनानुसारं शकुन्तलायाः स्वभावं निरुपयत।

सूचना- शकुन्तला------- अभिज्ञानशाकुन्तलं नाटकं------- नायिका। --- - --. उत्तमगुणान्विता।-------- परिणयति। दुर्वासशापं------- विस्मृता।अभिज्ञानदर्शनम्------- पुनः------- समागमः ।

20 सूचनानुसारं जीवनचरितं लिखत ।

नाम - स्वातितिरुनाल् ।

जन्म - 1813 एप्रिल् 13

पितरौ - राजराजवर्मा वलियकोयित्तम्पुरान् , राणी गौरी लक्ष्मीबाई च ।

प्रशस्ति : - गर्भश्रीमान् ।

कर्ममण्डलम् - प्रजापालनं , संगीतं च ।

कृतय : - रागमालिकास्वरजति :, नवरात्रिकीर्तनानि च ।

21 खण्डिकां पठित्वा प्रश्नानाम् उत्तराणि लिखत ।

पालक्काट् जिल्लायां लब्धजन्मा ओ. वि. विजयन् महाभाग : न केवलं चित्रकार : अपि तु कथाकार : च भवति । स : 1930 तमे वर्षे जुलै 2 तमे दिने जनिमलभत । स : पद्मभूषण् , साहित्य - अक्कादमी , एषुत्तच्छन् इत्यादिभि : पुरस्कारै : च समादृत : केरलीय : भवति । अस्य 'खसाक्किन्टे इतिहासम् ' इति आख्यायिका अतीव प्रसिद्धा । धर्मपुराणं, प्रवाचकन्टे वषि, मधुरं गायाति इत्यादय : तस्य इतरे ग्रन्था : ।

क) ओ. वि. विजयन् महाभागेन विरचिता आख्यायिका का?

ख) ओ. वि. विजयन् महाभाग : कुत्र जनिमलभत?

ग) खण्डिकात : भूतकालक्रियापदं चित्वा लिखत ।

घ) कै : पुरस्कारै : ओ. वि. विजयन् महाभाग : समादृत :?

22 प्रादेशिकभाषायां परिवर्तयत ।

श्रीनारायणभट्टपादस्य 'नारायणीयम् ' श्रीमहाभागवतस्य सारभूतं स्तोत्रकाव्यं भवति । वातरोगेण पीडित : अयं कवि : नारायणीय रचनया रोगविमुक्तिं प्राप इति कथा श्रूयते । अस्मिन् काव्ये सहस्राधिका : श्लोका : सन्ति । नारायणीये श्रीकृष्णस्य बाललीला सुललितपदै : भक्तिभावेन च वर्ण्यते । संस्कृतभाषाया : पोषणे मेल्पत्तुर् नारायणभट्टपादस्य योगदानं महदेव।